# MaHAshastrritri Shatanamavalih

# महाशास्तृत्रिशतनामावलिः

## Document Information

Text title : mahAshAstRRitrishatanAmAvaliH

File name : mahAshAstRRitrishatanAmAvaliH.itx

Category : deities_misc, ayyappa, shatInAmAvalI

Location : doc_deities_misc

Proofread by : PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

# महाशास्तृत्रिशतनामावलिः

ध्यानम् -
पूर्णापुष्कलयोः पतिं शिवसुतं दण्डासिशूलाब्जयुक्
    चक्रेष्वासशराभयेष्टकुलिशान् हस्तैर्वहं सादरम् ।
नानारत्नविचित्रितासनगतं कल्याणसिद्धिप्रदं
    वीरादिप्रमुखैः सुसेवितपदं शास्तारमीड्यं भजे ।

ॐ ह्रीं हरिहरपुत्राय पुत्रलाभाय मदगजवाहनाय महाशास्त्रे नमः इति मन्त्रवर्णाद्याक्षरघटिता ।

ओम् । औषधीशानचूडाङ्कहरिमोहिनिसम्भवाय नमः ।
ओतप्रोताखिलजगते । ओजस्विने । ओदनप्रियाय । ओमादिवर्णाय । ओकस्थाय ।
ओजोमण्डलनायकाय । औदार्यवते ।
औपनिषदमन्त्रविश्रुतवैभवाय नमः ॥ ९

ह्रीम् । ह्रीं वर्णमूलाय नमः । ह्रीङ्काराय । ह्रीमते । ह्रेषाहतासुराय ।
हृत्पद्मनिलयाय । ह्रादिने । हृद्याय । हृष्टाय ।
हृदिस्थिताय नमः ॥ १८

ह । हरिपुत्राय नमः । हरिप्रीताय । हरित्पतिसमर्चिताय ।
हरिणाङ्कमुखाय । हारिणे । हालाहलहराय । हरये ।
हर्यक्षवाहनारूढाय । हयमेधसमर्चिताय नमः ॥ २७

रि । रिरंसवे नमः । रिक्तसम्पूज्याय । रीतिमते । रीतिवर्धनाय ।
रिपुहर्त्रे । रिटीशानाय । रीङ्कृतिस्तब्धकुञ्जराय ।
रिङ्खद्घण्टामणिगणाय । रीङ्कारमनुदैवताय नमः ॥ ३६

ह । हरपुत्राय नमः । हराराध्याय । हरिणाङ्कशिखामणये ।
हयारूढाय । हरिहरसूनवे । हरिमुखार्चिताय । हय्यङ्गवीनहृदयाय ।

हरप्रेमसुताय । हविषे नमः ॥ ४५

र । रक्षकाय नमः । रक्षितजगते । रक्षोनाथविनाशकृते ।
रञ्जकाय । रजनीचारिणे । रणन्मञ्जीरभूषणाय ।
रतिनाथसमाकाराय । रतिमन्मथपूजिताय ।
रासक्रीडादिसन्तुष्टपूर्णापुष्कलाकन्यकाय नमः ॥ ५४

पु । पुण्डरीकाक्षसम्भूताय नमः । पुण्डरीकाजिनासनाय ।
पुरुहूतेडितपदाय । पुष्पदन्तसमर्चिताय । पुष्कलाभूषिततनवे ।
पुरन्दरसुतार्चिताय । पुरसंहारजनकपार्श्वस्थाय । पुण्यवर्धनाय ।
पुण्डरीकेभहर्यक्षतुरगाधिपवाहनाय नमः ॥ ९३

त्रा । त्रात्रे नमः । त्रयीनुताय । त्रस्ताभयकृते । त्रिगुणाधिकाय ।
त्रयस्त्रिंशत्कोटिदेवसेविताय । त्राणतत्पराय । त्रिविक्रमसमाकाराय ।
त्रिणेत्राय । त्रिविधाकृतये नमः ॥ ७२

य । यन्त्रे नमः । यन्त्रितदिग्दन्तिगिरिपन्नगमण्डलाय । यतीश्वराय ।
यज्ञवाटमध्यस्थाय । यजनप्रियाय । यजमानाय । यमिश्रेष्ठाय ।
यजुर्वेदप्रकीर्तिताय । यायजूकार्चितसभामध्यनाट्यविशारदाय नमः ॥ ८१

पु । पुरन्दरार्चिताय नमः । पुण्याय । पुरुषार्थप्रदायकाय ।
पुरुवंश्यनृपाभीष्टप्रदात्रे । पूर्णाहुतिप्रियाय । पुष्पाभिरामाय ।
पूषेन्दुवह्निमण्डलभासुराय । पुरत्रयमहाक्रीडाय ।
पुष्कलावर्तमण्डलाय नमः ॥ ९०

त्र । त्रियम्बकस्य तनयाय नमः । त्रिंशद्बाहवे । त्रिसूत्रभृते ।
त्रिकोणस्थाय । त्रयीवेद्याय । तत्र तत्र स्थले स्थिताय ।
तृणावर्तासुरहराय । त्रिकालज्ञाय । तृतीयकाय नमः ॥ ९९

ला । लाङ्गूलोपनिषद्गीताय नमः । लावण्यजितमन्मथाय ।
लवणासुरसंहर्त्रे । लक्ष्मणाग्रेसरार्चिताय । लक्ष्मीप्रदाय ।
लघुश्यामाय । लम्बिकायोगमार्गकृते । लतानिभतनुच्छायाय ।
लोभहीनजनाश्रिताय नमः ॥ १०८

भा । भानुकोटिप्रतीकाशाय । भाषमाणाय । भयापहाय । भीमसेनाय ।
भीमसखाय । भुक्तिमुक्तिपुलप्रदाय । भुसुण्डमुनिसंवेद्याय ।
भूषावते । भूतिभूषिताय नमः ॥ ११७

य । यातनारहिताय नमः । यज्वने । यक्षराजे । यमुनाश्रिताय ।
यन्त्रमन्त्रार्चनप्रीताय । यताक्षाय । यमशासनाय ।
यामिनीचरवीरादिगणसेव्याय । यमोन्नताय नमः ॥ १२६

श । शाङ्कराय नमः । शङ्करानन्दाय । शङ्खचक्रगदाधराय ।
शङ्खध्मानकराय । शास्त्रे । शकटैकरथोज्ज्वलाय ।
शर्वाणीतनयाय । शल्यनिग्रहाय । शकुनीडिताय नमः ॥ १३५

त्रु । त्रुट्यादिकालविज्ञात्रे नमः । त्रोटकादिमपूजिताय ।
त्रोटकादिमवृत्तज्ञाय । त्रिवर्णाय । त्रिजगत्प्रभवे । त्रिवर्गदात्रे ।
त्रिशतनामार्चनसुखप्रदाय । त्रिकाण्डिकाय । त्रिकूटाद्रिमध्यशृङ्ग-
निकेतनाय नमः ॥ १४४

ना । नराय नमः । नरार्चिताय । नारीयुगलाय । नरवाहनाय ।
नरनारायणप्रीताय । नतकल्याणदायकाय । नन्दिने । नन्दीशविनुताय ।
नारदादिमुनीडिताय नमः ॥ १५३

शा । शक्राय नमः । शक्तिधराय । शक्ताय । शरजन्मसहोदराय ।
शशाङ्कवर्णाय । शतधाकृतामित्राय । शरासभृते ।
शिवानन्दकराय । शैवसिद्धान्तमुदितान्तराय नमः ॥ १६२

य । यथातथाकृतविधये नमः । यज्ञसूत्रधराय । यूने ।
यत्नादुत्सारितकिटये । यथाविधि समर्चिताय । योगिनीगणसंवीताय ।
यक्षिण्युक्तजगत्कथाय । यन्त्रारूढमहामायाय ।
याकिन्यादिसमन्विताय नमः ॥ १७१

म । मन्त्रिणे नमः । मन्त्रविदां श्रेष्ठाय । मणिवाचे ।
मणिभूषणाय । महनीयाय । मरालस्थाय । मणिमण्डपसंस्थिताय ।
महाकल्पतरोर्मूलवासिने । मार्ताण्डभैरवाय नमः ॥ १८०

द । दण्डिने नमः । दण्डयित्रे । दण्डधराय । दैत्यान्तकात्मजाय ।
देवदेवाय । देवराजाय । दिव्यंससन्नटाधिपाय । दिवासमतनुच्छायाय ।
दिव्यगन्धाङ्गलेपनाय नमः ॥ १८९
ग । गजास्यसोदराय नमः ।
गौरीगङ्गासूनवे । गुणिने । गुरवे । गुरुकृपाय ।
गौरवर्णाय । गोकर्णस्थानवासकृते ।
गोदावरीतीरसंस्थाय । गोपिकानन्दवर्धनाय नमः ॥ १९८

ज । जगच्छास्त्रे नमः । जगन्नाथाय । जनकादिसुपूजिताय ।
जनाश्रिताय । जितक्रोधाय । ज्वरामयविनाशकाय ।
जम्भारिवन्दितपदाय । जगत्साक्षिणे । जपानिभाय नमः ॥ २०७

वा । वातघ्नाय नमः । वामनयनाय । वामनाय । वाञ्छितार्थदाय ।
वारणसीपतये । वाञ्छाकल्पाय । विन्ध्यविमर्दनाय ।
विन्ध्यारिमुनिसंसेव्याय । वीणावादनतत्पराय नमः ॥ २१६

ह । हयग्रीवनुताय नमः । हन्त्रे । हयानन्दाय । हितप्रदाय ।
हुताशनधराय । होत्रे । हुङ्कारध्वस्तकम्बलाय ।
हाटकश्रीसभानाथाय । हरगौरीप्रियोक्तिमुदे नमः ॥ २२५

ना । नागराय नमः । नागराध्यक्षाय । नभोरूपाय । निरञ्जनाय ।
निर्विकाराय । निराहाराय । निर्वाणसुखदायकाय । नित्यानित्यविशेषज्ञाय ।
निर्मानुष्यवनाश्रयाय नमः ॥ २३४

य । याम्याय नमः । यजनभूस्थायिने । यक्षराक्षसभेदनाय । योग्याय ।
योगपतये । युक्ताय । यामिनीचरघातकाय । यामिनीदस्युसंहर्त्रे ।
यमशासनशासनाय नमः ॥ २४३

म । मनोन्मनस्थानसंस्थाय नमः । मातामहहिमाचलाय ।
मारीरोगहराय । मन्युहीनाय । मान्धातृपूजिताय । मणिशूल-
गदेभेन्द्रनराश्वाङ्कितगोपुराय । मनोवेगातिगमनाय । महादेवाय ।
महेश्वराय नमः ॥ २५२

हा । हालास्यनायकाय नमः । हालाहलसेनापतीडिताय । हलिने ।
हलायुधनुताय । हरिद्राकुङ्कुमाङ्किताय । हनूमते । हनूमत्पूज्याय ।
हेमाद्रीशसुतापतये । हिमाचलगुहावासियोगिवृन्दसमावृताय नमः ॥ २६१

शा । शारदाय नमः । शारदानाथाय । शरच्चन्द्रनिभाननाय ।
शरानेकनिषङ्गाढ्याय । शरणागतवत्सलाय । शास्त्रज्ञाय ।
शाकरारूढाय । शयानाय । शिवताण्डवाय नमः ॥ २७०

स्त्रे । त्रापुषालयसन्त्राणपाण्डुपुत्रसुंसस्तुताय नमः । त्रातपाण्ड्य-
सुताराध्याय । तार्तीयीकाय । तमोहराय । ताम्रचूडध्वजप्रीतिजनकाय ।
तक्रपानमुदे । त्रिपदाक्रान्तभूताण्डाय । त्रिविधाय ।

त्रिदिनोत्सवाय नमः ॥ २७९

न । नमो जयस्वस्तिवाक्यप्रकीर्णध्वनिमन्दिराय नमः । नानारूपधराय । नानावेषवञ्चितपूर्वजाय । नामार्चनप्राणदात्रे । नरकासुरशिक्षकाय । नामसङ्कीर्तनप्रीताय । नारायणसमुद्भवाय । नन्दगोपयशोदात्रे । निखिलागमसंस्तुताय ॥ २८८

म । मधुमुदे नमः । मधुरावासिने । महाविपिनमध्यगाय । महारुद्राक्षकवचाय । महाभूतिसितप्रभाय । मन्त्रीकृतमहारायाय । महाभूतगणावृताय । महामुनीन्द्रनिचयाय । महाकारुण्यवारिधये । मनःसंस्मरणत्रात्रे नमः । महाशास्त्रे । महाप्रभावे नमः ॥ ३००

इति महाशास्तृत्रिशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran

*MaHAshastrritri Shatanamavalih*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*